त्युक्तं निर्णयामृतादौ। यमद्वितीया मध्याह्नव्यापिनी पूर्व्वविद्धा चेति हेमाद्रिः। अत्र विशेषो हेमाद्रौ स्कान्दे।
"ऊर्ज्जे शुक्लद्वितीयायामपराह्णेऽर्च्चयेत् यमम्।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति॥
ऊर्ज्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः।
वेष्टितः किन्नरैर्हृष्टैस्तस्मै यच्छति वाञ्छितम्॥"
तथा भविष्ये।
"प्रथमा श्रावणे मासि तथा भाद्रपदेऽपरा।
तृतीयाश्वयुजे मासि चतुर्थी कार्त्तिके भवेत्॥
श्रावणे कलुषा नाम तथा भाद्रे च गीर्म्मिता।
आश्विने प्रेतसञ्चारा कार्त्तिके याम्यका मता॥"
इत्युक्ता प्रथमायां व्रतं द्वितीयायां सरस्वतीपूजा तृतीयायां श्राद्धमुक्ता चतुर्थ्यामुक्तम्।
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!।
यमो यमुनया पूर्व्वं भोजितः स्वगृहेऽर्च्चितः॥
अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता।
अस्यां निजगृहे विप्र! न भोक्तव्यं ततो नरैः॥
स्नेहेन भगिनीहस्तात् भोक्तव्यं पुष्टिवर्द्धनम्।
दानानि च प्रदेयानि भगिनीभ्यो विधानतः॥
स्वर्णालङ्कारवस्त्रान्नपूजासत्कारभोजनैः।
सर्व्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः॥
प्रतिपन्ना माताभगिन्य इति हेमाद्रिः॥
पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर!।
मातुलस्य सुताहस्तात् द्वितीयायां तथा नृप!॥
पितुर्म्मातुः स्वसुः कन्ये तृतीयायां तयोः करात्।
चतुर्थ्यां सहजायाश्च भगिन्या हस्ततः परम्।
सर्व्वासु भगिनीहस्तात् भोक्तव्यं बलवर्द्धनम्॥
यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितः प्रतिजगत्स्वसृसौहृदेन।
तस्यां स्वसुः करतलादिह यो भुनक्ति
प्राप्नोति रत्नसुखधान्यमनुत्तमं सः॥
गौडास्तु।
यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत्।
अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः॥
मन्त्रस्तु।
एह्येहि मार्त्तण्डज! पाशहस्त!
यमान्तकालोकधरामरेश!।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते॥
भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम्।
प्रीतये यमराजस्य यमुनाया विशेषतः॥"
ज्येष्ठाग्रजातेति वदेदिति स्मार्त्ताः॥ इत्यन्नदानमित्यप्याहुः। ब्रह्माण्डपुराणेऽपि।
"या तु भोजयते नारी भ्रातरं युग्मके तिथौ।
अर्च्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात्॥
भ्रातुरायुःक्षयो राजन्! न भवेत्तत्र कर्हिचित्॥"
इति निर्णयसिन्धौ २ परिच्छेदः॥

भ्रातृपत्नी, स्त्री, (भ्रातापतिर्यस्या इति भ्रातुः पत्नीति वा। ऋन्नेभ्यो ङीप्। इति ङीप्। ततः + "नित्यं सपत्न्यादिषु।" इति नान्तादेशः।) भ्रातृजाया। इति शब्दरत्नावली॥

भ्रातृपुत्त्रः, पुं, स्त्री, (भ्रातुः पुत्त्रः।) भ्रातृजः। इति शब्दरत्नावली। भाइपो इति भाषा॥

भ्रातृभगिन्यौ, स्त्री, (भ्राता च भगिनी च। इति इतरेतरद्वन्द्वसमासः।) भ्रातरौ। द्विवचनान्तोऽयम्। इत्यमरः। २। ६। ३६॥

भ्रातृव्यः, पुं, (भ्रातुरपत्यमिति। "भ्रातुर्व्यच।" ४।१।१४४। इति व्यत्।) भ्रातृपुत्त्रः। (यथा, राजतरङ्गिण्याम्। ८। २८४२।
"जयराजानुजं राज्ञा यशोराजं निवेशितम्।
तन्मतिनावचस्कन्द भ्रातृव्यं राजकाभिधः॥"
भ्रातृ+"व्यन् सपत्ने।" ४।१।१४५। इति व्यन्।) शत्रुः। इति हेमचन्द्रः॥ (यथा, भागवते। ५। ११। १७।
"भ्रातृव्यमेतं त्वमदभ्रवीर्य्यमुपेक्षयाध्येधितमप्रमत्तः॥"
"तस्मात् भ्रातृव्यम् शत्रुम्।" इति तट्टीकायां स्वामी॥)

भ्रातृश्वशुरः, पुं, (पत्युर्ज्येष्ठभ्राता श्वशुर इव पूज्यत्वात्।) पतिज्येष्ठभ्राता। भाशुर इति भाषा। तत्पर्य्यायः। श्वशुरकः २। इति शब्दरत्नावली॥ (भ्रातुः श्वशुरः।) भ्रातुःपत्न्याः पिता च॥

भ्रात्रीयः, पुं, (भ्रातुरपत्यं पुमानिति। भ्रातृ + "भ्रातुर्व्यच।" ४।१।१४४। इत्यत्र 'चकारात् छश्च।' इति काशिकोक्तेः छः।) भ्रातृपुत्त्रः। इत्यमरः। २। ६। ३६॥ भ्रातृसम्बन्धिनि, त्रि॥

भ्रान्तः, त्रि, भ्रमणयुक्तः। भ्रान्तिविशिष्टः। (अतीन्द्रियमिन्द्रियं भ्रान्तानामधिष्ठाने॥" इति सांख्यसूत्रम्। २। २३॥)
भ्रमधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः॥ भ्रमणे, क्ली। यथा, वाभटपशुपतिभ्यां व्याख्यातम्।
"भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित् फलम्।"

भ्रान्तः, पुं, (भ्रम्+कर्त्तरि क्तः। "अनुनासिकस्येति। ६। ४। १५। इति दीर्घः।) राजधुस्तूरः। मत्तहस्ती। इति राजनिर्घण्टः॥

भ्रान्तिः, स्त्री, (भ्रम्+क्तिन्। "अनुनासिकस्य क्विझलोः क्ङिति।६। ४।१५। इति दीर्घः।) भ्रमः। इत्यमरः। १। ५।४॥
("युक्तिहीनप्रकाशत्वाद् भ्रान्तेर्नास्ति लक्षणम्।
यदि स्याल्लक्षणं किञ्चिद्भ्रान्तिरेव न सिध्यति॥"
इति तार्किकाः॥)
सा तु नराणां षष्ठमासे जायते। यथा,—
"षाण्मासिके तु संप्राप्ते भ्रान्तिः संजायते यतः।
धात्वाचराणि स्थानि पञ्चारूढ़ान्यतः पुरा॥"
इति ज्योतिस्तत्त्वम्॥
भ्रमणम्। इति मेदिनी॥ अनवस्थितिः। इति विश्वः॥

भ्रान्तिहरः, पुं, (भ्रान्तिं हरतीति। हृ+कर्त्तरि पचाद्यच्।) मन्त्री। इति शब्दमाला॥ भ्रमनाशके, त्रि॥

भ्रामकः, पुं, (भ्रामयति भ्रमं जनयतीति। भ्रम् + णिच्। "ण्वुल् तृचौ।" ३। १। १३३। इति ण्वुल्।) शृगालः। धूर्त्तः। सूर्य्यावर्त्तः। प्रस्तरभेदः। इति मेदिनी। के, १३३॥ चुम्बक पातर इति भाषा। भ्रमजनके, त्रि॥

भ्रामरं, क्ली, (भ्रमरैः कृतं सम्भृतमिति। भ्रमर + "क्षुद्राभ्रमरवटरपादपादञ्।" ४।३।११६। इति अञ्।) मधु। इति मेदिनी। रे, १६१॥ तत्तु भ्रमरजमधु। तस्य गुणाः। पिच्छिलत्वम्। रूक्षत्वम्। मधुरत्वम्। सुखजाड्यनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
पैच्छिल्यात् स्वादु भूयस्त्वात् भ्रामरं गुरु कीर्त्तितम्।"
इति राजवल्लभः।
अन्यच्च।
"किञ्चित् सूक्ष्मैः प्रसिद्धेभ्यः षट्पदेभ्योऽलिभिश्चितम्।
निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम्॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम्॥"
इति भावप्रकाशः॥
नृत्यविशेषः। तत्पर्य्यायः। रासः २ मण्डलनृत्यम् ३ हल्लीसम् ४। इति शब्दमाला॥ भ्रमरसम्बन्धिनि त्रि। यथा,—
"तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्।"
इति देवीमाहात्म्यम्॥
(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये। मध्वर्थे लक्षणं गुणाश्च।
"शीतं कषायं मधुरं लघु स्यात्
सन्दीपनं लेखनमेव शस्तम्।
संशोधनन्तु व्रणशोधनञ्च
संरोपणं हृद्यतमञ्च वल्यम्॥
त्रिदोषनाशं कुरुते च पुष्टिं
कासे क्षये वा क्षतजे च छर्द्दौ।
हिक्काश्रमे शोषप्रशीनसानां
रक्तप्रमेहे च तथातिसारे॥
रक्तातिसारे च सरक्तपित्ते
त्वग्दोषहृत् पार्श्वगदेऽपि शस्तम्।
नेत्रामये वा ग्रहणीगदे वा
विषे प्रशस्तं भ्रमरैश्चितं यत्॥
भ्रामरं सघनं जाड्यं भूयिष्ठं मधुरञ्च यत्।
रूक्षं विशेषतो ज्ञेयं शीतलं लघुलेखनम्॥")

भ्रामरः, पुं, (भ्रामयति लौहमिति। भ्रामि + "अर्त्तिकमिभ्रमिदेवीति।" उणा० ३। १३२। इति अरः। बाहुलकात् दीर्घश्च।) प्रस्तरभेदः। मेदिनी। रे, १६१॥ चुम्बक पातर इति भाषा॥ (अपस्माररोगः। इति भ्रामरी त्रि। यथा, मनौ। ३। १६१। [स्तथा॥"
"भ्रामरी गण्डमाली च श्वित्र्यथो पिशुन-
"भ्रामरी अपस्मारी।" इति तद्भाष्ये मेधातिथिः॥)

भ्रामरी, स्त्री, (भ्रमरस्यायं भ्रामरो भ्रमरवद्वर्णः। सोऽस्या अस्तीति। अर्श आद्यच्।